शस्तं वातकफानाहक्रिमिशोथोदरार्शसाम्” ॥
इति चरके सूत्रस्थाने सप्तविंशेऽध्याये ॥
“रूक्षोष्णं लवणं किञ्चिदीषद्‌ स्वादुरसं लघु।
शोफगुल्मोदरार्शोघ्नं क्रमि-कुष्ठ-विषापहम्” ॥
इति सुश्रुते सूत्रस्थाने ४५ अध्यायः ॥)

उष्णः, पुं, (उष दाहे + “इणसिञ्जिदीङुष्यविभ्यो नक्” ।३।२। इति उणादिसूत्रेण नक्।) ग्रीष्मऋतुः। तत्पर्य्यायः। ग्रीष्मः २ उष्मकः ३ निदाघः ४ उष्णोपगमः ५ उष्णागमः ६ तपः ७। इत्यमरः॥ आतपः। इति हेमचन्द्रः॥ (यथा, सुश्रुते चिकित्सितस्थाने २४ अध्यायः।
“उष्णे हैमे वसन्ते च कामं ग्रीष्मे तु शीतलम्”।
क्वचित् क्लीवलिङ्गान्तोऽपि दृश्यते।
यथा महाभारते संवर्त्तमरुत्तीये।१४।८।६।
“नोष्णं न शिशिरस्तत्र न वायुर्न च भास्करः”।
अग्निः। सूर्य्यः। यथा, मनुः ११। ११३।
“उष्णे वर्षति शीते वा मारुते वाति वा भृशम्”।
(“उष्णे आदित्ये मेघे च वर्षति” इति तट्टीकायां कुल्लूकभट्टः॥) पलाण्डुः। इति राजनिर्घण्टः॥ उष्णवीर्य्यद्रव्यगुणाः। पित्तबलकारित्वम्। लघुत्वम्। वातश्लेष्मनाशित्वञ्च। इति राजवल्लभः॥

उष्णः, त्रि, (उष + नक्।) निरालस्यव्यक्तिः। तत्पर्य्यायः। दक्षः २ चतुरः ३ पेशलः ४ पटुः ५ सूत्थानः ६। इत्यमरः। अशीतः। इति मेदिनी॥ (यथा मनुः। ३। २३७।
“यावदुष्णं भवत्यन्नं यावदश्नाति वाग्यतः” ॥)

उष्णकः, पुं, (उष्णं करोतीति। उष्ण + शीतोष्णाभ्यां कारिणीति कन्।) ग्रीष्मकालः। चंक्रमादिः। इति धरणी॥ (ज्वरः। इति पाणिनिः ५। २। ८१॥)

उष्णकः, त्रि, (उष्णं कार्य्यमस्य। उष्ण + कन्।) क्षिप्रकारी। आतुरः। इति मेदिनी॥ प्रणतः। इति धरणी॥ क्रोधोद्दीप्तः इति पाणिनिः ५। २। ७२॥)

उष्णनदी, स्त्री, (उष्णा नदी।) वैतरणी नदी॥

उष्णरश्मिः, पुं, (उष्णा रश्मयो यस्य।) सूर्य्यः। अर्कवृक्षः। इत्यमरः॥ (यथा, कुमारे ३। २५।
“कुबेरगुप्तां दिशमुष्णरश्मौ
गन्तुं प्रवृत्ते समयं विलङ्घ्य” ॥)

उष्णवारणः, पुं, क्ली, (उष्णमातपं वारयति। उष्ण + वृ + णिच् + ल्युट्।) छत्रम्। इति हारावली॥ (यथा, कुमारे ५। ५२।
“यदर्थमम्भोजमिवोष्णवारणं
कृतं तपःसाधनमेतया वपुः”।
छत्रशब्देऽस्य गुणादिकं ज्ञेयम्॥)

उष्णवीर्य्यः, पुं, (उष्णमुग्रं वीर्य्यं यस्य।) शिशुमारः। इति हेमचन्द्रः॥ तीव्रतेजोयुक्तद्रव्यादिः॥ (प्रचण्डवीर्य्ययुक्ते, त्रि॥)

उष्णा, स्त्री, (उष्यते बध्यते यया। उष बधे + नक् + टाप्।) क्षयव्याधिः। सन्तापः। पित्तम्। इति राजनिर्घण्टः॥ [हेमचन्द्रः॥

उष्णांशुः, पुं, (उष्णा अंशवो यस्य।) सूर्य्यः। इति

उष्णागमः, पुं, (उष्णस्यागमो यस्मिन्।) ग्रीष्मकालः। इत्यमरः॥

उष्णाभिगमः पुं, (उष्णस्यातपस्याभिगमो यत्र।) ग्रीष्मऋतुः। इति शब्दरत्नावली॥

उष्णासहः पुं, (उष्ण आतप आसह्यते यत्र। उष्ण + आ + सह + अच्।) हेमन्तऋतुः। इति राजनिर्घण्टः॥ (उष्णासह्यकारिणि, त्रि॥)

उष्णिक्, [ह्] स्त्री, (उत् + स्निह + क्विन्। निपातनात् उपसर्गान्तलोपः षत्वं च।) सप्ताक्षरच्छन्दः। (यथा छन्दोमञ्जर्य्यां,—
“उक्थात्युक्था तथा मध्या प्रतिष्ठान्या सुपूर्ब्बिका।
गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च” ॥
उष्णिक् सप्ताक्षरा वृत्तिः। सा च त्रिधा मधुमती-कुमारललिता-मदलेखाभेदात्। उदाहरणपूर्ब्बकं तल्लक्षणं यथा तत्रैव। “ननगि मधुमती”।
“रविदुहितृतटे घनकुसुमनतिः।
व्यधित मधुमती मधुमथनमुदम्” ॥ १॥
“कुमारललिता जसगाः” ॥
“मुरारितनुवल्ली कुमारललिता सा।
व्रजैणनयनानां ततान मुदमुच्चैः” ॥ २॥
“मसगौ स्यान्मदलेखा” ॥ “रङ्गे बाहुविरुग्णात् कुम्भीन्द्रान्मदलेखा। लग्नाभून्मुरशत्रोः कस्तूरीरसचर्च्चा” ॥

उष्णिका, स्त्री, (अल्पमन्नमस्याम्। ब्राह्मणकोष्णिके संज्ञायामिति कन्। निपातनादन्नशब्दस्योष्णादेशः।) यवागुः। इत्यमरः॥ याउ इति भाषा।

उष्णीषः,पुं, क्ली, (उष्णमीषते हिनस्तीति। ईष गतिहिंसादर्शनेषु। इगुपधेति कः। शकन्ध्वादिः।) शिरोवेष्टः। इत्यमरः॥ पाग इति भाषा। अस्य गुणाः। केशचक्षुरायुर्वर्द्धकत्वम्। धूलिशीतोष्णनिवारकत्वञ्च। इति राजवल्लभः॥ यथा।
“उष्णीषं कान्तिकृत् केश्यं रजोवातकफापहम्।
लघु चेच्छस्यते यस्मात् गुरुपित्ताक्षिरोगकृत्” ॥
इति भावप्रकाशः॥ किरीटः। (यथा, महाभारते सौभवधोपाख्याने ३। २१। २४।
“विशीर्णमलिनोष्णीषः प्रकीर्णाम्बरमूर्द्धजः”।
रजोऽवश्यायसूर्य्यांशुहिमानिलनिवारणं।
प्रतिश्यायशिरःशूल-हरञ्चोष्णीषधारणम्।
इति वैद्यकचक्रपाणिकृतद्रव्यगुणे गुणानां क्रियाभिधानादिवर्गे॥
“बाणवारं मृजावर्णतेजोबलविवर्द्धनम्।
पवित्रं केश्यमुष्णीषं वातातपरजापहम्” ॥
इति सुश्रुते चिकित्सितस्थाने २४ अध्याये॥) चिह्नान्तरम्। इति मेदिनी॥

उष्णोदकं, क्ली, (उष्णञ्च तत् उदकञ्चेति।) तप्तजलम्। क्वाथ्यमानपादावशेषार्द्धावशेषपादहीनं जलम्। तद्विधिर्यथा।
“अष्टमेनांशशेषेण चतुर्थेनार्द्धकेन वा।
अथवा क्वथनेनैव सिद्धमुष्णोदकं वदेत्” ॥
अस्य गुणाः। सदा पथ्यत्वम्। कासज्वरविबन्धकफवातामभेदोनाशित्वम्। दीपनत्वम्। वस्तिशोधनत्वञ्च।

“श्लेष्मामवातमेदोघ्नं वस्तिशोधनदीपनम्।
कासश्वासज्वरान् हन्ति पीतमुष्णोदकं निशि” ॥
इति भावप्रकाशे प्रथमखण्डम्॥ * ॥ अर्द्धोष्णोदकस्य लक्षणं गुणाश्च।
“क्वाथ्यमानन्तु निर्व्वेगं निष्फेनं निर्म्मलन्तथा।
अर्द्धावशिष्टं यत्तोयं तदुष्णोदकमुच्यते ॥
ज्वर-कास-कफ-श्वास-वात-पित्ताम-मेदसाम्।
नाशनं वस्तिसंशोधि पथ्यमुष्णोदकं सदा ॥ * ॥
ऋतुभेदे जलस्य पाकभेदः। यदाह,
त्रिपादशेषं सलिलं ग्रीष्मे शरदि शस्यते।
“हिमेऽर्द्धशेषं शिशिरे तथा वर्षावसन्तयोः” ॥
अन्ये तु।
“निदाघे त्वर्द्धपादोनं पादहीनन्तु शारदम्।
शिशिरे च वसन्ते च हिमे चार्द्धावशेषितम् ॥
अष्टमांशावशेषन्तु वारि वर्षासु शस्यते।
इति केचिद्बुधाः प्राहुर्ज्जलटागमदर्शनात्” ॥
केचित्तु।
“वसुष्वङ्गेषु बाणेषु वेदेषु त्रिषु पक्षयोः।
एकभागावशेषं स्यादम्बु वर्षादिषु क्रमात्” ॥
अत्र दोषाणां यथोल्वणता हीनता वा तथा व्यवस्था कल्पनीया॥
“तत्पादहीनं पित्तघ्नमर्द्धहीनन्तु वातनुत्।
त्रिपादहीनं श्लेष्मघ्नं संग्राह्यग्निप्रदं लघु” ॥ * ॥
त्रिपादहीनस्य तन्त्रान्तरे आरोग्याम्बुसंज्ञा।
तस्य लक्षणगुणाः।
“पादशेषन्तु यत्तोयमारोग्याम्बु तदुच्यते।
आरोग्याम्बु सदा पथ्यं कास-श्वास-कफापहम् ॥
सद्यो ज्वरहरं ग्राहि दीपनं पाचनं लघु।
आनाहपाण्डुशूलार्शोगुल्मशोथोदरापहम्” ॥
इति भावप्रकाशे मध्यमखण्डम्॥ रात्रौ उष्णोदकपानगुणाः। श्लेष्मसङ्घातभेदकत्वम्। मारुतापकर्षित्वम्। आशु अजीर्णजारकत्वञ्च।
“तत्पादहीनं वातघ्नं मध्यहीनं तु पित्तनुत्।
कफघ्नं पादशेषञ्च पानीयं लघु दीपनम्” ॥
इति राजनिर्घण्टः॥
(“शरदीह तथा ग्रीष्मे क्वाथ्ये पादावशेषितम्।
शिशिरे च वसन्ते च कुर्य्यादर्द्धावशेषितम्” ॥
विपरीतमृतुं दृष्ट्वा प्रावृषं वार्द्धभागिकम्।
क्वाथ्यमानञ्च निर्व्वेगं निष्फेनं निर्म्मलञ्च यत् ॥
अर्द्धावशिष्टं भवति तदुष्णोदकमुच्यते।
तत्पादहीनं वातघ्नञ्चार्द्धं पित्तविकारजित् ॥
कफघ्नं पादशेषन्तु पानीयं लघु पाचनम्”।
“दिवसे क्वथितं तोयं रात्रौ तद्गुरुतां व्रजेत्।
रात्रौ शृतन्तु दिवसे गुरुत्वमधिगच्छति” ॥
इति हारीते प्रथमस्थाने ७ अध्याये।
“दीपनं पाचनं कण्ठ्यं लघूष्णं वस्तिशोधनम् ॥
हिक्काध्मानानिलश्लेष्म सद्यःशुद्धे नवज्वरे।
कासामपीनसश्वासपार्श्वरुक्षु च शस्यते” ॥
“अनभिस्यन्दि लघु च तोयं क्वथितशीतलम्।
पित्तयुक्ते हितं दोषे व्युषितं तत्त्रिदोषकृत् ॥
इति वाभटे सूत्रस्थाने ५ अध्याये ॥
“कफमेदोऽनिलामघ्नं दीपनं वस्तिशोधनम् ॥